# संस्कृतरूपकविमर्शः

डॉ. ललितकिशोरशर्मा*

**सारांशः -**

संस्कृतसाहित्ये नाट्यम् अत्यन्तम् अभ्यर्हिततया उत्कृष्टतया च सर्वैः आचार्यैः एकस्वरेण इतरकाव्यविलक्षणम् अङ्गीकृतम्। काव्यं हि दृश्यश्रव्यभेदेन द्विधा भिद्यते। तत्र श्रव्यकाव्यभेदे महाकाव्यखण्डकाव्यादीनि आगच्छन्ति। दृश्यकाव्यभेदे तु नाट्यम् अन्तर्भवति। नाट्यं हि नटाश्रितं भवति। नट अवस्पन्दने इत्यस्मात् धातोः नटशब्दः नटति इति नटः इति कर्त्रर्थे निष्पन्नः। अवस्पन्दनम् इत्यत्रापि नटधातोः अवस्पन्दरूपे अर्थे ग्रहणीये आचार्यैः स्पदि किञ्चिच्चलने इति धातुपाठनिर्दिष्टस्य अर्थस्य साहाय्यकम् आश्रितम्। इत्थं किञ्चित् चलनविशिष्टः अभिनयः भावमनाश्रित्य निर्वोढुम् अशक्यक्रियः भवतीति भावमाश्रित्यैव कृतं किञ्चिच्चलनं कुर्वन् कर्ता नटः इति व्यपदिश्यते। तस्य कर्म च नाट्यं भवति। इत्थं नाट्ये भावस्य एव प्राधान्यम्। अत एव उक्तं दशरूपके अन्यत् **'दशधैव रसाश्रयमिति'**[1] अत्र नाट्यादीनां भावाश्रितत्वम् इत्यत्र भावशब्दः रसादिपर एव विवक्षितः। न तु बहुलाङ्गिकाभिनयपरः। तथात्वे नृत्ये लक्षणस्य अतिव्याप्तिः स्यात्।

**कूटशब्दाः** – अवस्पन्दनम्, नाट्यशास्त्रम्, वचनविन्यासः, विगलितवेद्यान्तरं, पाठयमृग्वेदात्, अनवद्या, कविताकामिनीविलासः, भवभूतिर्विशिष्यते।

---

**आचार्यभरतमुनिः -**

नाट्यविषयकः ग्रन्थः नाट्यशास्त्रमेव सर्वप्राचीनः। अयं ग्रन्थः महर्षिणा भरतेन रचितः। षट्त्रिंशत् सहस्राणि श्लोकाः अस्मिन् ग्रन्थे सन्ति। भरतमुनेः पूर्वमपि अन्येषां सदाशिवतण्डुप्रभृतीनां नाट्यकृतां परिचयः। नाट्यशास्त्रादेव अवगम्यते। तथापि नाट्यशास्त्रमेव नाट्यविषये आकरग्रन्थत्वेन उपलभ्यन्ते महीयते च।

---

1 दशरूपकम् – १/७ (पृ.सं.-७)

महर्षिणा भरतेन नाट्यशास्त्रे **'लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्'**[2] इति नाट्यस्य स्वरूपम् अभिहितम्। अत्र लोकवृत्तमित्यत्र लोकशब्दः चेतनपर एव न तु काव्यप्रकाशे इव स्थावरजङ्गमात्मकः। स्थावरजङ्गमात्मकस्य लोकस्य वृत्तं हि न अनुकर्तुं शक्यम्। लोकस्य वृत्तं नाम लोकस्य स्वभावः स च सुखदुःखमोहस्वरूपः। तस्य लोकस्वभावस्य अनुकरणं भावभिदादृष्ट्या सम्पन्नेन कविना काव्यात्मकरूपेण निर्दिश्यते। प्रेक्षकाणां विनोदाय अधिमञ्चं रीतिविशेषसमाश्रयपूर्वकं विधीयते च तदा तदैव अनुकरणम् अभिनयः इति उच्यते। स च अभिनयः आङ्गिकः वाचिकः आहार्यः सात्त्विकश्च। तत्र अङ्गानां चालनेन पात्रानुकरणम् आङ्गिकः अभिनयः। वचनविन्यासः वाचिकः अभिनयः। असतां रथतुरगादीनां विद्यमानत्वेन चालनारोहणादिकम् आहार्याभिनयः। रतिक्रोधादीनां मानसिकानां भावानां भ्रूक्षेपादिभिः व्यक्तीकरणं सात्त्विकाभिनयः। इत्थम् एतानि चतुर्विधानि अनुकरणानि अभिनयत्वेन नाट्यशास्त्रे परिभाषितानि। उक्तं हि भरतमुनिना -

**योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।**
**सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥**[3] इति।

इदं च नाट्यं रामादीनां नायकानाम् अवस्थानुकरणात्मकम् इति उक्तप्रायम्। इदमेव नाट्यं दृश्यकाव्यत्वेन दृश्यम् इत्यपि उच्यते। दृश्यत्वादेव एतद् रूपम् इत्यपि उच्यते। अनुकर्तरि नटे अनुकार्यस्य रामादेः समारोपात् रूपकम् इत्यपि उच्यते। तदुक्तं दशरूपके -

**अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते।**
**रूपकं तत्समारोपात् इति...............॥**[4] इति।

अस्य च नाट्यस्य दश भेदाः नाट्यग्रन्थेषु वर्णिताः। ते च नाटकं प्रकरणं भाणः प्रहसनं डिमः व्यायोगः समवकारः वीथिः अङ्कः इहामृगः चेति। तदुक्तं दशरूपके –

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥**[5] इति।

नाट्यं प्रेक्षकाणां हृदि विगलितवेद्यान्तरं परमानन्दसन्दोहं रसशब्दव्यपदेश्यं ब्रह्मास्वादसहोदरं जनयत् सार्थकं भवति। नाट्यप्रेक्षणे जायमानः रसानुभवः ब्रह्मानुभवः एव।

---

[2] नाट्यशास्त्रम् - १/११२

[3] नाट्यशास्त्रम् - १/११२

[4] दशरूपकम् - १/७ (पृ.सं.-४-६)

[5] दशरूपकम् -१/८

योगिनां ब्रह्मानुभवेत् चिदाकारः चित्तवृत्तिः भवति। अज्ञानस्य च आत्यन्तिकः नाशः भवति। तथैव रसिकानामपि नाट्यदर्शनवेलायां चिदाकारचित्तवृत्तिः भवति परन्तु आवरणनिवृत्तिः न आत्यन्तिकी जायते। इत्थं स्वरूपभूतः आत्मैव रसत्वेन प्रकाशते। अत एव उक्तं 'रसो वै सः' इति भगवत्या श्रुत्या अपि। इदं नाट्यं सर्वेषामपि जनानां भिन्नरुचीनाम् आराधकं सत् कृत्ये प्रवर्तने अकृत्यात् निवर्तने च अनितरसाधारणक्षमतामण्डितं राजते। इत्थं सुखेन ज्ञानरसप्रदातृत्वात् हिताहितशास्तृत्वात् च नाट्यं वेदत्वेनापि व्यपदिश्यते अभियुक्तैः। उक्तं हि नाट्यशास्त्रे महर्षिणा -

**जग्राह पाठयमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथवर्णादपि॥**[6] इति।

इत्थमेव दशरूपकेऽपि उक्तम् -

**कस्यचिदेव कदाचिद्दयया विषयं सरस्वती विदुषः।**
**घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम्॥**[7]

नाट्ये पाठ्यस्य भागस्य ऋग्वेदात् सङ्गीतस्य साम्नः अभिनयस्य यजुर्वेदात् रसानां च अथर्ववेदात् ग्रहणं कृत्वा सर्ववर्णसुलभं पञ्चमं वेदं भगवान् ब्रह्मा विरचयामास। इमं नाट्यवेदं विरचय्य भगवान् विरञ्चिः भरताय प्रयोगार्थम् इमं ददौ।

महाकविः कालिदासः नाट्यं प्रयोगप्रधानं मन्यते। प्रयोगशब्दस्य अर्थः इदानीं प्रस्तुतिः इति शब्दस्य यः अर्थः सः एव। अत एव अस्य तन्त्रस्य बोधः विज्ञानम् इति शब्देन उक्तः न तु बोधयति पदेन। उक्तं हि तत्र -

**आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥**[8] इति।

महाकविः कालिदासः नाट्यस्य मर्मवेत्ता विद्यते। सः महर्षिं भरतं प्रयोगकर्तृषु आदर्शभूतं मन्यते। अत एव विक्रमोर्वशीयाख्यस्य त्रोटकस्य मध्ये भरतविरचितं लक्ष्मीस्वयंवरनाटकम् इन्द्रसभायां कुर्वतीम् उर्वशीं वर्णयति। नाट्यवेदस्य आदिप्रयोक्ता भरतमुनिरेव इति परम्परायाम् अभिमन्यते। तेन देवासुरसङ्ग्रामस्य पुरुषपात्रमात्रघटितः प्रयोगः सर्वप्रथमं कृतः। भरतस्य इमं प्रयोगं प्रेक्ष्य नटराजः शिवः प्रसन्नः सन् उद्धृतं ताण्डवं पार्वतीद्वारा कोमलं लास्यं च प्रसादितवान्। उभयमपि इदम् अर्धनारीश्वरः लास्यं ताण्डवं च भरतोपज्ञेन प्रयोगेण सह आत्मनि धारयति

---

6 नाट्यशास्त्रम् - १/१५

7 दशरूपकम् – १/३

8 अभिज्ञानशाकुन्तलम् -१/२

शिवः। एतेन प्रकारेण सकलजनमनोरञ्जकस्य नाट्यस्य आधिदैवीं समुत्पत्तिं मालविकाग्निमित्रे महाकविः कालिदासः करोति। तद्यथा -

**देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्॥**[9] इति।

सुखदुःखमोहात्मकत्रिगुणजन्यस्वभाववत् अपि लोकचरितं नाट्ये नानारसमयं दृश्यते। अतः भिन्नभिन्नस्वभावैः भिन्नभिन्नरुचिभिः जनैः नानारसयुक्तत्वादेव नाट्यदर्शने रसानुभूतिः प्राप्यते। अनेन प्रकारेण वस्तुनेतृभेदैः बहुधा अपि नाट्यम् अस्मिन् जगति एकमेव सर्वस्य लोकस्य सन्तर्पकं विद्यते।

सर्वमपि ज्ञानं सर्वमपि शास्त्रं सकलमपि शिल्पं निखिला विद्या अशेषा कला समस्तः योगः समानि च कर्माणि नाट्ये अन्तर्भूतानि भवन्ति। अतः लोके विद्यमानं वस्तु तादृशं किमपि नास्ति यत् नाट्ये अन्तर्भवितुं नार्हति। किं बहुना '**अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि**' इति न्यायेन लोके अविद्यमानमपि निष्कलङ्कचन्द्रादिकम् आहार्याभिनयमाध्यमेन नाट्ये अन्तर्भवितुम् अर्हन्ति अनुभवितुं च शक्यन्ते। नाट्यस्य इमं गुणम् अक्षिलक्षीकृत्य नाट्यप्रपञ्चस्य जागतिकप्रपञ्चात् व्यापकताम् अनुसन्दधानः भरतर्षिः नाट्यशास्त्रे नाट्यमाहात्म्यम् एवम् आह -

**न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥**[10] इति।

इदं च नाट्यं वेदकालादेव आरभ्य अस्मिन् भारतदेशे प्रसर्तुम् आरब्धं केचन पाश्चात्त्याः विमर्शकाः नाटकेषु दृश्यपरिवर्तनसमये प्रयुज्यमानस्य मञ्चप्रच्छदपटस्य यवनिका इति नाम दृष्ट्वा यवनदेशात् एव नाट्यपरम्परायाः भारते आगमनं मन्यन्ते। परन्तु एतद् सर्वथा निराधारं यतः ऋग्वेदे एव यज्ञानां सम्पादनकर्मणि ऋत्वजां कथोपकथनं पुरूरवसः पूर्वस्याः च संवादः, यमयमीसंवादः इत्यादय विषयः नाट्यस्य बीजरूपेण उपलभ्यन्ते। इत्थं वेदादेवास्य नाट्यस्य प्रारब्धत्वात् अत्र यवनदेशात् नाट्यस्य आगमनकथनं सर्वथा असम्बद्धम्।

भारतीयपरम्परायां महर्षेः भरतस्य देवासुरसंग्रामम् अधिकृत्य विरचितं नाटकमेव आदिमं मन्यते। अस्मिन् विषये महाकविः कालिदासः अपि अस्मान् किञ्चित् तथ्यम् उपदिशन्

---

[9] मालविकाग्निमित्रम् - १/४

[10] नाट्यशास्त्रम् - १/१०६

उपकरोति। सः भरतं लक्ष्मीस्वयंवरनामकस्य नाटकस्य विरचयितारं कथयति। परन्तु भरतस्य नाट्यशास्त्रे नाट्यस्य यावन्तः आवश्यकाः अंशाः तावतां सर्वेषामपि अंशानां साङ्गोपाङ्गवर्णनम् इदमेव सूचयति यत् भरतात् बहुतिथात् कालात् पूर्वमेव नाट्यस्य प्रचलनं मञ्चेषु अभिनयः च आसीदिति। न केवलमेतावदेव भरतात् पूर्वं नाट्यविषयकाणाम् इतरेषाम् अपि ग्रन्थानां सद्भावः नाट्यशास्त्रस्य सर्वाङ्गपूर्णतां विलोक्य ऊहितुं शक्यते।

इतश्च भरतनाट्यशास्त्रे देशकालावस्थाभेदैः नाट्यगृहस्य वर्तुलत्रिकोणादिरूपैः अनेकधा वर्णनं नाट्यशास्त्रात् पूर्वं नाट्याभिनयार्थं निर्मितस्य स्थलविशेषस्य सूचनां ददत् महर्षेः भरतस्य काले नाट्यस्य विकासे परमोत्कर्षं प्रतिपादयन्ति। इतश्च आश्चर्यकरः अयं विषयः यत् नाट्यस्य मूलभूततत्त्वम् आत्मभूतं वस्तु, सर्वस्वायमाणं च रसः एव इति महर्षिणा सिद्धान्तितम्। यस्मिन् हि विषये अर्वाचीनाः अपि विप्रतिपद्यमानाः विलोकिताः। यतः देशात् नाट्यस्य प्रवेशः पाश्चात्त्यैः विद्वद्भिः अमन्यत तस्मिन्नेव देशे प्रायः एतच्छताब्दीपर्यन्तं नाट्यस्य आत्मभूततत्त्वस्य विषये निश्चिता अवधारणा नासीत्। महर्षिः भरतस्तु रसस्य निष्पादनप्रक्रियामपि सर्वथा अव्यभिचारिणीं प्रदर्शयन् आत्मनः क्रान्तदर्शित्वं ऋषित्वञ्च सुष्ठु प्रतिष्ठापयति। उक्तं हि महर्षिणा **'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'**[11] इति। एतद्धि सूत्रं नाट्यशास्त्रे परिचयवतां सुप्रसिद्धम्। एतदनन्तरं महर्षिणा यद् उक्तं तत्र प्रायः सर्वेषाम् अवधानं न भवति। तत्र हि उक्तं महर्षिणा **'न हि रसाद् ऋते कश्चित् अर्थः प्रवर्तते'**[12] इति।

इत्थं विश्वस्मिन् विश्वे प्रचलत्सु नाट्यविषयकग्रन्थेषु एतावत्पर्यन्तं विरचितेषु नाट्यशास्त्रस्य स्पर्धाकोटौ आरोहणार्हः न कश्चिदपि इति निश्चप्रचम्। एवमेव यथा काव्यपरिशीलकेषु ग्रन्थेषु नाट्यशास्त्रमनुत्तमं तथैव लक्ष्यग्रन्थेष्वपि काव्यविधापतितेषु नाट्यस्य तुलां नान्या विधा आटीकितुम् ईष्टे। इत्थं रसमेदुरतया पक्वं फलमिव आह्लादाकरभूतं नाट्यं दारागारादिभारपीडितस्य सांसारिकजनस्य केवलं चित्तरञ्जकं सर्वदुःखशमनं परमान्दकरं समाराधकं प्रेक्षकाणां कृते बहुभिः ऋषिकल्पैः कविभिः बहुभिः प्रकारैः विरचितम्।

- **महाकविभासः -**

महर्षेः भरतात् अनन्तरं महाकविः भासः संस्कृतसाहित्येतिहासे नाट्यपरम्परायां महनीयैः नाटकैः उपतिष्ठते। विमर्शकानुसारं भासस्य स्थितिकालः ख्रिस्तोः पूर्वं पञ्चमशताब्दीति मन्यते। तदारभ्य नाट्यविकासस्य या लहरी उद्भूता सा एतावत्पर्यन्तं वीचितरङ्गन्यायेन समुन्मिषन्ती पुष्टा हृद्या अनवद्या च वर्द्धते। इदानीम् उपलभ्यमानेषु नाटकेषु आदिमं नाटकं भासस्य एव। अतः

---

11 नाट्यशास्त्रम्।

12 नाट्यशास्त्रम्।

संस्कृतनाटकानाम् आदिपुरुषः महाकविः भासः कथयितुं शक्यते। प्रस्तुतशोधप्रबन्धस्य नायकभूतेन डॉ.हरिरामाचार्येण अपि उक्तं **'ईसापूर्वपञ्चमशताब्दात् नाट्यविकासस्य परम्परा तदा सुष्ठुतया प्रारब्धा, यदा संस्कृतनाटकस्य 'आदिपुरुषः' जनकश्च कविताकामिन्या हासो महाकविभासः नाट्यरचनामञ्चे अवातरत्'**[13] इति। महाकवेः भासस्य नाटकानाम् असम्भवकल्पं सङ्ग्रहणं पण्डितवर्यैः गणपतिशास्त्रिभिः गतायाः शताब्द्याः आरम्भे महता प्रयासेन कृतम्। तैः भासकृतत्वेन त्रयोदश नाट्यानि प्रकाशितानि। एतानि नाटकव्यायोगादिभेदेषु यथायथम् अन्तर्भवन्ति। भासकृतेषु नाटकेषु स्वप्नवासवदत्तम् अतिप्रसिद्धम्। एतां प्रसिद्धिम् अनुसृत्य एव सुबन्धुना वासवदत्ता इति गद्यकाव्यं विरचितम्। अस्य स्वप्नवासवदत्तनाटकस्य अनुबन्धरूपेण श्रीहर्षकविना रत्नावली विरचिता।

- **महाकविशूद्रकः -**

ततः संस्कृतसाहित्ये नाट्यपरम्परायाः शोभां वर्धयन् महाकविः शूद्रकः समुपस्थितो भवति। अस्य महाकवेः मृच्छकटिकं नाम प्रकरणम् अतिप्रसिद्धम्। इदं नाटकं भासस्य दरिद्रचारुदत्तनामकात् रूपकात् प्रभावितं विद्यते। इदं हि नाट्यं तात्कालिकस्य राज्यस्य राज्यव्यवस्थायाः सामाजिकस्य व्यवहारस्य कौटुम्बिकनां नियमानां च आदर्शभूतमिव विद्यते। अतः भारते देशे सहस्राब्दीद्वयात् प्राक् स्थितिः कीदृशी आसीत् इति अनुमातुम् इदं नाटकम् अव्यभिचरितस्य हेतोः स्थानं गृह्णाति।

- **महाकविकालिदासः**

इतः परं विश्वसाहित्याः तिलकभूतः कविताकामिनीविलासः महाकविः कालिदासः संस्कृतनाट्यस्य प्रातिनिध्यं करोति। कालिदासस्य त्रयः नाटकाः विश्रुताः। तत्र एकं त्रोटकम्। तानि च मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलं चेति। अस्य समयः प्रायेण ईसापूर्वं प्रथमशताब्दी मन्यते।

**And all by which the Soul is charmed**
**Raptured, feasted fed?**
**Wouldst thou the earth and heaven itself**
**On one sole name combine?**
**I name thee, O Shakuntala, and all at once is said.**[14]

इति विश्वप्रसिद्धैः वैदेशिकैरपि महाकविभिः स्तुतप्राशस्त्यं नाटकं विरचय्य संस्कृतसाहित्यस्य गौरवाधानं महाकविना कालिदासेन कृतम्। कालिदासस्य नाटकेषु

13 पूर्वशाकुन्तलम् – नेपथ्यकथने

14 अभिज्ञानशाकुन्तलम् – पृ.सं.-२०

लोकोत्तराह्लादजनकता वैदिकसम्प्रदायस्य परिमलश्च प्रतिपदम् आस्वादयितुं आघ्रातुं च शक्यते।

- **महाकवि-अश्वघोषः**

ईसाप्रथमशताब्द्यां बौद्धसाहित्यकारः अश्वघोषः स्वकीयैः त्रिभिः नाटकैः संस्कृतसाहित्यश्रियम् अलङ्कृतवान्। एषु शारिपुत्रं नाम एकं प्रकरणम्। अन्यद्द्वयं खण्डितांशं एव उपलभ्यते। उभयोरपि अनयोः नाटकयोः नाम न प्राप्यते। इमानि नाटकानि डॉ.लूडर्समहोदयेन प्राप्तानि।

इतः परं महाकविहर्षः संस्कृतनाटककारेषु अत्यन्तं प्रसिद्धम्। अस्य समयः ख्रैस्तवसप्तशताब्द्याः पूर्वभागः। एतद्विरचितानि त्रीणिनाटकानि संस्कृतनाटकेषु रत्नभूतानि सन्ति। तानि च प्रियदर्शिका रत्नावली नागानन्दश्च। नाट्यशास्त्रीयदृष्ट्या रत्नावल्याः महत्त्वम् असाधारणं विद्यते। नाट्यविमर्शनपरेषु ग्रन्थेषु रत्नावली आदर्शरूपेण विमर्शकः आद्रियते।

- **महाकविभवभूतिः -**

हर्षात्परं महाकवेः भवभूतेः समयः। महाकविः भवभूतिः संस्कृतनाटककारेषु कालिदासमपि अतिशयानः विराजते। उच्यते हि रसिकैः **'उत्तरे रामचरिते भवभूतिर्विशिष्यते।'** अस्य कवेः नाटकानि प्रसिद्धानि। तानि च महावीरचरितं मालतीमाधवम् उत्तररामचरितञ्चेति। उत्तररामचरितम् अत्यन्तं प्रसिद्धम्। भवभूतिः करुणमेवरसं प्रधानं मनुते। उक्तं हि तेन **एको रसः करुण एव।**[15] इति

- **महाकविविशाखदत्तः -**

भवभूतेः कालादनन्तरं महाकविः विशाखदत्तः भारतीयनाट्येषु अनितसाधारणात्मनः स्थानं सावकाशी कृतवत्सु मुख्यः। अस्य समयः सप्तमी शताब्दी इति मन्यते। एतद् विरचितं नाटकं मुद्राराक्षसाख्यं संस्कृतसाहित्ये अपूर्वं विलक्षणस्वरूपं च विद्यते। इदं नाटकम् इतिहासस्य बहून् विषयान् समुपस्थापयत् ऐतिहासिकान् अपि उपकरोति। राजनीतिदृष्ट्या च एतद् नाटकं संस्कृतसाहित्ये अद्वितीयमेव।

- **भट्टनारायणः -**

अनुविशाखदत्तं भट्टनारायणः स्वकीयेन वेणीसंहाराख्येन नाटकेन संस्कृतसाहित्ये नाटकेषु वीररसस्य विषयं प्रख्यापयामास। भारतीयानां नाटकविमर्शकानां कृते इदं नाटकं रत्नावली इव आदर्शभूतं विद्यते। दशरूपके साहित्यदर्पणे षष्ठे नाटकनिरूपणपरिच्छेदे च वेणीसंहारात् अनेकानि उदाहरणानि स्वीकृतम्।

---

15 उत्तररामचरितम् – ३/४७ (पृ.३८२)

- **अन्ये प्रसिद्धाः नाट्यकाराः -**

भट्टनारायणमनु महाकविः मुरारि स्वकीयेन अनर्घराघवाख्येन नाटकेन संस्कृतसाहित्यनाटकेषु शास्त्रीयजटिलतां वैदुष्योचितप्रौढिमानं च योजयामास। ततः शक्तिभद्रस्य आश्चर्यचूडामणिः दामोदरमिश्रस्य हनुमन्नाटकं च अष्टम्याः नवम्यां च शताब्द्यां प्रसिद्धम्। हनुमन्नाटकं अङ्कदृष्ट्या संस्कृतसाहित्ये विशालतमं विद्यते। दशम्यां शताब्द्यां संस्कृतनाटककारेषु काव्यविमर्शकेषु च अग्रणीषु अन्यतमः महाकविः राजशेखरः स्वकीयैः चतुर्भिर्नाटकैः संस्कृतसाहित्यम् उपकृतवान्। तानि च नाटकानि कर्पूरमञ्जरी विद्धशालभञ्जिका बालरामायणं बालभारतञ्चेति। एषु कर्पूरमञ्जरी अत्यन्तं प्रसिद्धा। प्राकृतभाषायां चतुर्षु अङ्केषु निबद्धा इयं नाट्यविधायां सट्टके अन्तर्भवति।

राजशेखरस्य समकालिकेन क्षमीश्वरेण नाटकद्वयं विरचितम्। नैषधानन्तरं चण्डकौशिकञ्चेति। दशम्याम् एव शताब्द्यां दिङ्नागस्य कुन्दमालानामिका नाटिका अपि प्रसिद्धा वर्तते। ततः परं साहित्यरसिकान् प्रमोदयत्सु नाटकेषु जयदेवस्य प्रसन्नराघम् अत्यन्तं महत्त्वपूर्णं विद्यते। अत्र रामायणस्य कथा रुचिजनकतया प्रस्तुता। प्रसन्नराघवस्य अनेकेषां पद्यानां रामचरितमानसे अनुवादोऽपि दृश्यते। अस्य कालः द्वादशी शताब्दी मन्यते। अस्मिन्नेव काले वत्सराजेन नाटकसट्कं कृत्वा भारतीयनाटकेषु महत्वपूर्णं योगदानं कृतम्। तानि च नाटकानि किरातार्जुनीयः व्यायोगः कर्पूरचरितं हास्यचूडामणिः रुक्मिणीहरणं त्रिपुरदाहः समुद्रमन्थनञ्चेति। संस्कृतनाटकेषु न केवलमेतादृशमेव अपितु साङ्केतिकविधां प्रस्तुवानानां रूपकात्मकशैल्यां लिखितानां नाटकानमपि कश्चन कूटः दृश्यते। तत्र एकादश शताब्द्याम् उत्पन्नस्य कृष्णमित्रस्य प्रबोधचन्द्रोदयनामकं नाटकम् एतादृशविधायाम् आदीतया उपलभ्यते। अस्मिन् नाटके अद्वैतवेदान्तस्य सिद्धान्तः रुचिरया शैल्या समुपस्थापितः। अस्यामेव शैल्यां सर्वतन्त्रस्वतन्त्रेण कवितार्किकसिंहबिरुदभाजाश्रीमता वेङ्कटनाथेन वेदान्तदेशिकेन सङ्कल्पसूर्योदयनामकं नाटकं विरचितम्। अस्मिन् नाटके विशिष्टाद्वैतसिद्धान्तस्य अतिमधुरया शैल्या समुपस्थापनं कृतम्।

- **उपसंहारः -**

इत्थं आचार्यभरतमुनितः वेङ्कटनाथपर्यन्तं संस्कृतरूपकाणां विषये अस्मिन् शोधालेखे विमर्शः कृतः। अस्यां नाट्यपरम्परायां यद्यपि इतोऽपि बहवः महाकवयः नाट्यप्रणेतारः वर्तन्ते किन्तु तेषां वर्णनं संस्कृतसाहित्ये प्रचुरतया न लभ्यते एतस्मात् कारणादत्र वर्णनं न कृतम्। संस्कृतं जनमानसस्य भाषा कथं भवेत्। कथं जनाः संस्कृतं प्रति स्वरुचिं उत्पादयेयुः एतदर्थं संस्कृतरूपकमाध्यमेन तेषां मञ्चनं कृत्वा जनानां सम्मुखे आनयितुं भाषैषा समर्था। एतस्मात् कारणात् संस्कृतरूपकाणां प्रचारः प्रसारः भवेदित्थं मया शोधालेखोऽयं परिचयात्मकदृष्ट्या विलिखितः।

---

*सहायकाचार्यः - संस्कृतसाहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम्।